## Topic 29 भ्वादिगण आत्मनेपदी धातुएँ - 2

इणः षीध्वंलुङ्लिटां धोऽङ्गात् ।

इण्णन्तादङ्गात् परेषां षीध्वंलुङ्लिटां धस्य ढः स्यात् । एधाञ्चकृढ्वे । एधाञ्चक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे । एधाम्बभूव । एधामास । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे ।

धि च ।

धादौ प्रत्यये परे सस्य लोपः । एधिताध्वे ।

ह एति ।

तासस्त्योः सस्य हः स्यादेति परे । एधिताहे । एधितास्वहे । एधितास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधिष्यसे । एधिष्येथे । एधिष्यध्वे एधिष्ये । एधिष्यावहे । एधिष्यामहे ।

आमेतः ।

लोट एकारस्याम् स्यात् । एधताम् । एधेताम् । एधन्ताम्

लोट के एकार के स्थान पर 'आम्' आदेश होता है। उदाहरण के लिए लोट् लकार के प्रथम पुरुष एकवचन में 'एध्' धातु से 'त' प्रत्यय आदि होकर 'एधते' रूप बनने पर एकार के स्थान पर 'आम्' होकर 'एधत् आम्' = 'एधताम्' रूप सिद्ध होता है।

सवाभ्यां वामौ ।

सवाभ्यां परस्य लोटेतः क्रमाद् वामौ स्तः । एधस्व, एधेथाम् । एधध्वम् ।

एत ऐ ।

लोडुत्तमस्य एत ऐ स्यात् । एधै, एधावहै, एधामहै ।
आटश्च - ऐधत, ऐधेताम्, ऐधन्त । ऐधथाः, ऐधेथाम्, ऐधध्वम् । ऐधे, ऐधावहि, ऐधामहि ।

लिङः सीयुट् ।

लिङादेशानां सीयुडागमः स्यादात्मनेपदे । सलोपः - एधेत । एधेयाताम् ।

झस्य रन् ।

लिङो झस्य रन् स्यात् । एधेरन् । एधेथाः, एधेयाथाम्, एधेध्वम् ।

इटोऽत् ।

लिङादेशस्य इट अत् स्यात् । एधेय, एधेवहि, एधेमहि ।

सुट् तिथोः ।

लिङस्तथोः सुट् । यलोपः । आर्धधातुकत्वात् सलोपो न । एधिषीष्ट, एधिषीयास्ताम्, एधिषीरन्, एधिषीष्ठाः, एधिषीयास्थाम्, एधिषीध्वम् । एधिषीय, एधिषीवहि, एधिषीमहि । ऐधिष्ट, ऐधिषाताम् ।

आत्मनेपदेष्वनतः

अनकारात् परस्यात्मनेपदेषु झस्य अत् इत्यादेशः स्यात् । ~~ऐधिषत~~ ऐधिषत । ऐधिष्ठाः, ऐधिषाथाम्, ऐधिढ्वम् । ऐधिषि, ऐधिष्वहि, ऐधिष्महि । ऐधिष्यत, ऐधिष्येताम्, ऐधिष्यन्त । ऐधिष्यथाः, ऐधिष्येथाम्, ऐधिष्यध्वम् । ऐधिष्ये, ऐधिष्यावहि, ऐधिष्यामहि ।